National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 343-344
© 2026 NJHSR
www.sanskritarticle.com

**डा. हेमन्त कुमार मुदुलिः**
प्राध्यापकः, व्याकरणविभागः,
विजयचान्दसंस्कृतमहाविद्यालयः,
समागोलम्, कुजङ्गम्, जगतसिंहपुरम्

**Correspondence:**
**डा. हेमन्त कुमार मुदुलिः**
प्राध्यापकः, व्याकरणविभागः,
विजयचान्दसंस्कृतमहाविद्यालयः,
समागोलम्, कुजङ्गम्, जगतसिंहपुरम्

# पाणिनीयव्याकरणे कर्तृस्वरूपविमर्शः

**डा. हेमन्त कुमार मुदुलिः**

भावप्रकटनाय भाषा अनुपममाध्यममवचिनोति इति भाषाविज्ञानविदः तथ्यमिदं परीक्ष्य विवेचयन्ति। व्याकरणं केवलं तस्या सार्वजनीनतां साधयति। एकस्मिन् यथाविधि नियमविशेषे पदानि वाक्यानि वध्नाति। तत्र शास्त्रीयविवेचनदृष्ट्या वाक्यं निष्कर्षभूतं तदुक्तम्-

**"वाक्यस्फोट अतिनिष्कर्षे तिष्ठतीति मतस्थिति"**[1]

वाक्यं नाम सुप्तिङ्ग्चयरूपं, एकतिङ्वाक्यम्, आख्यात साव्ययकारकं सविशेषणं वाक्यमिति विवेचनाय बहुनि लक्षणानि आविर्भूतानि वर्त्तन्ते। यदस्तु वक्तुः विवक्षानुरोधात् अभिरुचिं पुरस्कृत्य पदानां संख्या वाक्ये उपजायते। व्यवहारे यत् प्रतिपद्यते तदनुसारं एकस्य तिङन्तपदस्य मुख्यमेव अवलम्बनमंगीक्रियते। तदनुरोधात् तत् संघटनसम्बन्धात् च अन्येषां पदानां विनियोजनं विषयी क्रियते। तस्यैव तिङ्न्तपदस्य वाक्ये उपस्थिति उपायद्वयेन संस्थाप्यते। स्वरूपेण तस्यैव पदस्य साक्षात् उच्चारणं कदाचित् अनुवृत्त्या तत् पदोपस्थापनं अभिरुचिमर्य्यादया स्थिरीक्रियते। वाक्यस्य तस्य संघटनं विविधे उपाये संस्कृतभाषायाः उपजायते। विशेषतः चत्वारः उपायाः अवलम्बिता सन्तः वैशिष्ट्यमवधार्यते। ताश्च प्रक्रियाः-

1. कर्तृप्रक्रिया
2. कर्मप्रक्रिया
3. भावप्रक्रिया
4. कर्मकर्तृप्रक्रिया चेति।

कर्तुः स्वरूपनिरूपणावसरे आचार्य्यपाणिनिना अष्टाध्याय्यां प्रोक्तम्**- "स्वतन्त्रः कर्ता"**[2] (पा. सु-1/4/54) इति। तत्र **"क्रियायां स्वातन्त्र्येण विवक्षितः अर्थः कर्त्ता स्यात्"**[3] इति दीक्षितेन सूत्रार्थः अभिहितः। "तन्त्र" प्रधाने सिद्धान्ते सूत्रवाक्यपरिच्छदे- अमरकोशे (3/3/185)। अत्र अन्यार्थापेक्षया तन्त्रशब्दस्य प्रधानार्थः ग्रहणीयः। स्वम् तन्त्रं प्रधानम् अस्य इति विग्रहानुस्वारं स्वतन्त्रशब्दः स्वप्रधानार्थकः भवति। कुत्र स्वतन्त्रम् इति चेदुच्यते- क्रियासिद्धी यत् कारकं स्वतन्त्रः भवति तदेव कर्त्ता भवति। एवम्भूतं प्राधान्यं वक्तुः विवक्षया आश्रितं भवति। अत एव स्थाली पचति इत्यादिप्रयोगाः शुद्धाः भवन्ति। वक्तुः विवक्षया चेतनम् अचेतनम् च उभयविधम् कर्तृपदवाच्यं भवितुमर्हति। वाक्ये कर्तुः उपस्थानात् करणादयः गौणाः भवन्ति। करणादीनाम् अनुपस्थिती अपि वाक्ये शेते इत्यादिक्रियाप्रयोगे केवलम् कर्त्ता दृश्यते। कर्तुः विना क्रिया स्थातुं न शक्नोति। अत एव कर्त्रा प्रवर्त्तिताः काष्ठादयः करणसंज्ञां लभन्ते। उक्तञ्च-

**"प्रागन्यतः शक्तिलाभान्यग्भावापादानादपि।**
**तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्त्तनात्।।**
**अदृष्टत्वात् प्रतिनिधेः प्रविवेकेऽपि दर्शनात्।**
**आशदप्युपकारित्वात् स्वातन्त्र्यं कर्तुरीच्यते"**[4] । (वा. प-3/4/101-102)

अपि च-

तद्वृतौ निद्रितौ च कारकाणां यः ईश्वरः अप्रयुक्तः प्रयुक्तो वा कर्ता कारकमीष्यते।

धातोः क्रियायाः वा अर्थद्वयं स्वीकियते। उक्तञ्च भूषणसारे कौण्डभट्टेन फलव्यापारयोर्धातुः इति। अत एव धातोः अर्थद्वयं फलं व्यापारश्च। तत्र फलाश्रयः कर्म व्यापाराश्रयश्च कर्त्ता। देवदत्तः पचति इत्यत्र पचनव्यापारस्य आश्रयः कर्ता देवदत्तः क्रियाजनकः भवति। अत्र पचिक्रियायाः मुख्यः व्यापारः अवान्तरव्यापाराणां समूहः भवति। उक्तञ्च-

**"गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।**

**बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते"**[5] ।। (वा. प. 3/8/4)

पाकक्रियायां चूल्युपरि स्थाल्याः स्थापनम्, स्थाल्यां जलानां पूरणम्, तत्र तण्डुलानां स्थापनम्, ततः इन्धनसंयोजनादयः अवान्तरव्यापारभूताः भवन्ति ।

कौण्डभट्टस्य मतानुसारम्- शुद्धकर्त्ता प्रयोजकः कर्त्ता, कर्मकर्त्ता च इति कर्तुः भेदाः सन्ति। तत्र अणिजन्तावस्थायां यः कर्ता सः शुद्ध कर्ता भवति। यथा छात्रः वेदं पठति। णिजन्तावस्थायाम् यः कर्ता सः प्रयोजकः कर्ता भवति। यथा- गुरुः छात्रं वेदं पाठयति। सौकर्यार्थं यदा कर्म कर्तृस्वरूपेण विवक्षितं भवति, तदा कर्मकर्त्ता भवति। उक्तञ्च-

**"क्रियमाणं तु यत्कर्म स्वयमेव प्रसिध्यति ।**

**सुकरैः स्वैर्गुणैः कर्तुः कर्मकर्तेति तद्विदः"**[6] ।।

यथा- वृक्षः छिद्यते स्वयमेव।

प्रयोगावस्थायां कर्तुः द्विविधः भेदः भवति। तद्यथा- 1. उक्तः कर्त्ता, 2. अनुक्तः कर्ता च।

1. उक्तः कर्त्ता कर्तृवाच्यप्रयोगे कर्त्ता तिङा उक्तः भवति। अतः उक्ते कर्त्तरि प्रातिपदिकार्थमात्रे प्रथमाविभक्तिः भवति। यथा- छात्रः विद्यालयं गच्छति ।

2. अनुक्तः कर्त्ता- कर्मवाच्यप्रयोगे भाववाच्यप्रयोगे च कर्त्ता तिङा अनुक्तः भवति। अतः अनुक्ते कर्त्तरि कर्तृ-करणयोस्तृतीया इति सूत्रेण तृतीयाविभक्तिः भवति। यथा - छात्रेण विद्यालयः गम्यते। बालकेन हस्यते इति।

**सहायकग्रन्थसूची**


1. भर्तृहरिः, वाक्यपदीयम्, व्याख्याकारः डॉं. शम्भुदयालपाण्डेयः, चौखम्भा ओरियन्टालिया, दिल्ली-110007, 2021
2. पाणिनिः, अष्टाध्यायी, सम्पादकः डॉं. नरेश झा,चौखम्बा सुरभारती प्रकाशमनम्, 2023
3. अमरसिंहः, अमरकोशः, अनुवादकः कन्हैयालाल जोशी, चौखम्भा ओरियन्टालिया, दिल्ली-110007, 2019
4. भट्टकौण्डः, वैयाकरणभूषणसारः, संस्कर्त्ता पं. नन्दकिशोरशास्त्री, आचार्य श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, चौखम्बा सुर-भारती प्रकाशमनम्, 2012
5. दीक्षितभट्टोजिः, सिद्धान्तकौमुदी, चौखम्बा संस्कृत प्रतिष्ठानम्, 2002


**सन्दर्भ**

1. वा.प.
2. पा. सू. १/४/५४
3. का.वृत्ति.
4. वा.प. ३/४/१०१-१०२
5. वा.प. ३/८/४
6. म.भा.